॥ श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं मायावादखण्डनम् ॥
॥ हरिः ॐ ॥

नरसिंहोऽखिलज्ञानमतध्वान्तदिवाकरः ।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

विमतं अनारम्भणीयम् । अन्यथाप्रतिपादकत्वात् ।
यदित्थं तत्तथा । यथा सम्प्रतिपन्नम् ॥

न हि ब्रह्मत्मैक्यस्य यथार्थ्यं तत्पक्षे । अद्वैतहानेः
स्वरूपातिरेके । अनतिरेके स्वप्रकाशत्वादात्मनः सिद्धसाधनता ।
निर्विशेषत्वादात्मनः नानधिगतो विशेषः । सिद्धत्वात्
स्वरूपस्य विशेषाभावाच्चनाज्ञानं कस्यचिदावरकम् ।
अनधिगतार्थगन्तृ प्रमाणं इति च तन्मतम् ।

अज्ञानासम्भवादेव तन्मतमखिलमपाकृतम् ।
मिथ्यात्वे चैक्यस्य अतत्त्वावेदकत्त्वमागमस्य स्यात् ।
सत्यता च भेदस्य ।
एवमेव प्रयोजनमपि निरस्तम् । स्वरूपत्वान्मोक्षस्य
पूर्वमेव सिद्धत्वात् । अज्ञानसम्भवेन चतुर्थ–
प्रकाराभावात् पञ्चमप्रकारतापि निरस्ता । विषय–
प्रयोजनाभावदेवाधिकारी च । तदभावादेव सम्बन्धोऽपि ॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमम् ॥
यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वाबुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तं अव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ॥

ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॐ
इति विष्णोः सर्वोत्तमत्वमेव शास्त्रार्थत्वेन भगवता श्रुत्या च अभिहितम् ॥

इति सर्वज्ञमुनिना मायावादतमोऽखिलम् ।
निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥

नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं मायावादखण्डनं समाप्तम् ॥
॥ श्री कृष्णार्पणमस्तु ॥